# पितुः आज्ञानुवर्ती परशुरामः

पुरा जमदग्निर्नाम मुनिः आसीत्। तस्य त्रयः पुत्राः अभवन्। तेषु कनिष्ठः परशुरामः। तस्य जननी कदाचित् विकृतमानसा भूत्वा होमाय तीर्थं उचिते काले न आहृतवती। तस्याः मनोविकारं ज्ञात्वा जमदग्निः तां हन्तुं पुत्रान् आदिशत्।

प्रथमौ द्वावपि सुतौ मातृहननं अन्याय्यं इति मत्वा तूष्णीं अभवताम्। तेन नितान्तं क्रुद्धो जमदग्निः परशुरामं अब्रवीत्–“वत्स, अग्रजौ मातरं च मारय” इति। सः पितुराज्ञां शिरसा वहन्, तथैव जननीं सोदरौ च हत्वा पितरमुपजगाम।

तेन कर्मणा अतिप्रीतो जमदग्निः, “वत्स, वरं वृणीष्व” इति व्याजहार। तदा परशुरामः, “मे माता, अग्रजौ च सजीवाः उत्तिष्ठेयुः” इति वरं

वव्रे। जमदग्निरपि “तथाऽस्तु” इत्युक्त्वा कमण्डलुजलेन तान् अजीवयत्। पश्यत, पितुः आज्ञानुवर्तनेन परशुरामः पितृप्रीतिं, स्वजननीं, ज्येष्ठौ च सर्वं प्राप्तवान्। अतः-“आज्ञा गुरूणां अविचारणीया।”